# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–तत्त्वाचार्य (SEM-1) | **प्रश्नपत्रम्**–२ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०५/१२/२०१८ | **सन्दर्भग्रन्थः**– लिङ्गपुराणम् | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ कस्याप्येकस्य श्लोकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या । ०५**

१. एकनैव हृतं तत्त्वं व्याप्तं त्वेवं शिवेन तु ।
अलिङ्गञ्चैव लिङ्गश्च लिङ्गलिङ्गानि मूर्तयः ॥

२. नमोऽस्तु ते महादेव भुजा नार्हति शङ्कर ।
मृत्युहीना विभोः स्त्रष्टुं मृत्युयुक्ताः सृज प्रभो ॥

**प्र-२ लिङ्गपुराणस्य परिचयं प्रतिपाद्य तत्प्रतिपादितविषयाणां वर्णनं कुरुत । १०**

**अथवा**

**ग्रन्थाधारेण अष्टाङ्गयोगस्य वर्णनं कुरुत ।**

**॥ द्वितीयान्वितिः ॥**

**प्र-३ कस्याप्येकस्य श्लोकस्य ससन्दर्भपूर्वकं व्याख्या कार्या । ०५**

१. लिङ्गार्चनं विना निष्ठा नास्ति तस्माज्जनार्दनः ।
आत्मनो यजते नित्यं श्रद्धया भगवान् प्रभुः ॥

२. जप नित्यं महाप्राज्ञं सर्वपापविनाशनम् ।
इष्टदं परमं शुद्धं पवित्रं मङ्गलं परम् ॥

**प्र-४ लिङ्गार्चनविधिं विलिख्य शिवमाहात्म्यं लिखत । १०**

**अथवा**

**भगवतः रुद्रस्य विराट्स्वरूपं विवर्ण्य पातालादिलोकानां वर्णनं कुरुत ।**

**॥ तृतीयान्वितिः ॥**

**प्र-५ कस्याप्येकस्य श्लोकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या । ०५**

१. अर्धनारीनरवपुस्तेजसा ज्वलनोपमः ।
स्वेच्छयासौ द्विधाभूतः पृथक् स्त्री पुरुषः पृथक् ॥

२. शुभावती तदा देवी पार्श्वसंस्था विभाति सा ।
चामरासक्तहुस्ताग्रा सा हेमाम्बुजवर्णिका ॥

**प्र-६** **भुवनकोशवर्णनं कृत्वा चन्द्रादिग्रहाणां गतिवर्णनं कुरुत।** **१०**

**अथवा**

**पञ्चाक्षरविद्यां मन्त्रं जपविधानं लिखत।**

**॥ चतुर्थान्वितिः ॥**

**प्र-७** **कस्याप्येकस्य श्लोकस्य ससन्दर्भप्रसङ्गपूर्वकं व्याख्या कार्या।** **०५**

१. तस्मात्सर्वप्रयत्नेन भक्तया भक्तैः शिवालयम्।
कर्तव्यं सर्वयत्नेन धर्मकामार्थसिद्धयेत ॥

२. ओङ्कारस्तु त्रयो लोकाः शिरस्तस्य त्रिविष्टपम्।
भुवनाङ्गं च तत्सर्वं ब्राह्मं तत्पदमुच्यते ॥

**प्र-८** **सनत्कुमारेभ्यः शिवज्ञानोपदेशं विलिख्य वाराणसीमाहात्म्यं वर्णयत।** **१०**

**अथवा**

**पार्वत्याः जन्मकथां तपश्चर्यां च विलिख्य शिवताण्डवनृत्यकथां लिखत।**

**प्र-९** **दशप्रश्नानां लघूत्तरं लिखत।** **१०**

१. श्रीकृष्णः कस्याश्रमं गत्वा पाशुपतज्ञानं प्राप्नोति?
२. पार्वती कस्य पुत्री आसीत्?
३. शिवस्य प्रथमः विवाहः कया सह अभवत्?
४. कस्याज्ञया विश्वकर्मा लिङ्गानां निर्माणं करोति?
५. चन्द्रः एकस्यां राशौ कियत्कालं यावत् वसति?
६. बुधः कस्य पुत्रः?
७. कस्य मायया ब्रह्माविष्णू विमोहितौ भवतः?
८. लिङ्गपुराणे कति श्लोकाः?
९. पूर्वार्धे कति अध्यायाः सन्ति?
१०. ययातिः कस्मिन् वंशे जातः?
११. पञ्चाक्षरमन्त्रः कः ?
१२. उत्तानपादस्य पुत्रौ कौ?
१३. अस्माकं निवासः कस्मिन् द्विपे वर्तते?
१४. मृत्युञ्जयमहादेव............. पूर्णं कुरुत।
१५. अघोरमन्त्रं लिखत।

--००--